श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ सुन्दरबाहुदशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness* *śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ सुन्दरबाहुदशकम् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

लक्ष्मीमुग्धनिवासपर्वत इति प्रावोचमीषत्स्वनः
    लक्ष्मीमुग्ध उपेत्य तूर्णमविशत् पूर्णं मदीयं मनः।
लक्ष्मीमुग्धहृदो ममापि यदि चेत्सेयं दशा का पुनः
    लक्ष्मीमुग्धपदाब्जमुग्धमनसः कारेरपत्यस्य नः॥ 1 ॥

वने भवाख्ये परितोऽविरामं
    भयङ्करे हन्त ! सदा भ्रमन्तम्।
वनाद्रिवासिन्नतिसुन्दराङ्ग !
    त्वदङ्घ्रिपद्मैकरतिं विधेयाः॥ 2 ॥

वने वने सन्ति धराधरेन्द्राः
    वनानि भूयांसि च तेषु तेषु।
वनाद्रिनामा पुनरेष शैलः
    वनं च वृक्षाश्च गिरिर्भवान् यत्॥ 3 ॥

सौन्दर्यमाधुर्यमयीमये ! त्वं
    मूर्तिं समाधाय गिरावमुष्मिन्।
उद्यानसौन्दर्ययुते विहारं
    गङ्गाम्बुमाधुर्ययुते विधत्से॥ 4 ॥

श्रीचापपुर्यां मम तातपादैः
    सन्दर्शितं ते भगवन् ! गिरीन्द्रम्।

आसेव्य नित्यं पुलकाङ्कितोऽहम्
अत्यन्तमानन्दनिधिर्भवामि ॥ 5 ॥

धनुष्पुरेऽस्मिन् बहुमानभूमा
ममान्तरेवं वनशैलनाथ !।
गिरिस्त्वदीयो नयनद्वयं यत्
आनन्दयत्यत्र सतो जनस्य ॥ 6 ॥

गिरीशोऽयं सत्यं तव गिरिरसौ सुन्दरहरे !
भवन्मूर्तिं हृद्यां भजति निजपार्श्वेन नियतम्।
वहत्येनां गङ्गां निजशिरसि लीनामृतकरः
महानार्यामोदं कलयति सदा यत्स्ववपुषा ॥ 7 ॥

ज्योतिर्ज्योतिरिति श्रुतिर्वदति यत् ब्रह्माहमेवास्मि तज् -
ज्योतिर्मूर्तिरनेकधावगमनः सौन्दर्यसाराकृतिः।
अत्यन्तोन्नतविस्तृतातिनिविडच्छायैर्द्रुमैरावृते
शैलेऽस्मिन्निति वक्ति मङ्गलनिधिः श्रीमान् वनाद्रीश्वरः ॥ 8 ॥

वृषभभूधररत्नविभूषणं
वृषभवाहधनुः परिभञ्जनात्।
वृषभमर्दनतश्च वृताङ्गनं
वृषभमेकमहं शरणं भजे ॥ 9 ॥

नूपुरगङ्गासलिलासक्तेः
नूपुरनादे लक्ष्म्यास्सरतेः।
नूपुरदृष्टेर्नन्दितसौरेः
नूपुररम्यं पादमुपासे ॥ 10 ॥

सुन्दरबाहोर्दशकं
    सुन्दरवल्लीसुतेन मानिधिना।
सुन्दरमेतद्रचितं
    सुन्दरसम्पत्समूहदं पठताम्॥ **11** ॥

॥ इति सुन्दरबाहुदशकं समाप्तम्॥